# संस्कृतवार्ता:

दिनाङ्क :- 31/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- गृहमन्त्री अमितशाह: प्रोक्तवान् यत् नरेन्द्रमोदिप्रशासनस्य समग्र-दृक्पातेन भारतस्य स्वास्थ्यसेवाप्रणाली उन्नता कृता।
- भूकम्पप्रभाविते म्यांमारदेशे भारतद्वारा साहाय्योद्धारकार्याणि विधीयन्ते। सेनासमूह: श्व: आरभ्य स्वचिकित्सा-सेवा: स्थापयिष्यति।
- उत्तरप्रदेशे एकं बृहत्तमं प्रशासनिकं पुनर्स्थापनं कृत्वा इलाहाबादोच्च-न्यायालयेन द्वयशीत्यधिक -पञ्चशत-सङ्ख्यका: न्यायिकाधिकारिण: स्थानान्तरिता:।
- भारतीयवायुसेना ग्रीसदेशे समारप्स्यमाणे बहुराष्ट्रियवायु-अभ्यासे इनीयोकॉस-पञ्चविंशतितमे भागं स्वीकरिष्यति।
- ईद-उल-फित्र-इति उत्सव: अद्य सम्पूर्णे देशे धार्मिकोल्लासेन सह आमान्यते।
- आई.पी.एल. क्रिकेट् मालिकायाम् मुम्बई इण्डियंस् दलं अद्य सायम् वानखेडे-प्राङ्गणे कोलकाता-नाईट-राइडर्स दलं स्पर्धिष्यते।

---

अमित-शाह:

केन्द्रीयगृहमन्त्री अमितशाह: अद्य हरियाणाया: हिसारे महाराजा-अग्रसेन-चिकित्सकीय महाविद्यालये नवनिर्मितस्य गहनोपचारैकांशस्य महाराज्ञ: अग्रसेनस्य च भव्यस्य प्रतिमाया: उद्घाटनं कृतवान्। असौ महाविद्यालयस्य स्नातकोत्तर-छात्रावासस्य चापि शिलान्यासं कृतवान्। अत्रावधौ अमितशाह: प्रोक्तवान् यत् नरेन्द्रमोदिप्रशासनस्य समग्र-दृक्पातेन भारतस्य स्वास्थ्यसेवाप्रणाली उन्नता कृता।

कार्यक्रमे एतस्मिन् मुख्यमन्त्री नायब -सिंह-सैनी, स्वास्थ्य-मंत्री आरती राव:, लोक-निर्माणमन्त्री रणबीर-गंगवा, हिसारस्य विधायक: सावित्री जिंदल:, कुरुक्षेत्रस्य सांसद: नवीनजिंदल: उपस्थिता: आसन्।

----------------------------------------------

विदेशमन्त्रालयेन

विदेशमन्त्रालयेन शुक्रवासरे म्यान्मारदेशस्य भूकम्पेन दुष्प्रभावितस्य 'उ हला थीन्मठ इत्यत्र उद्धारकार्यं प्रारब्धम् । सेनादलम् श्वः प्रभृतिः चिकित्सासेवाः करिष्यति। विदेशमन्त्रालयस्य अनुसारेण राष्ट्रियापद्मोचनबलेन भूकम्पे बौद्धमठे ग्रस्तानां प्रायः सप्तत्यधिक -एकशत-भिक्षुकाणां रक्षणार्थं ब्रह्मा - अभियानं प्रारब्धम्। तत्रैव म्यांमार देशेन सप्तदिवसानां राष्ट्रियशोक: घोषित:। अत्रावधौ राष्ट्रियध्वज: अस्मिन् देशे अर्द्धनत: भविष्यति। शुक्रवासरे समागतेन भूकम्पेन मृतकानाम् संख्या सप्तदशशतं यावत् जाता।

----------------------------------------------

उत्तर प्रदेश-परिवर्तनम्

उत्तरप्रदेशे एकं बृहत्तमं प्रशासनिकं पुनस्थापनं कृत्वा इलाहाबादोच्च न्यायालयेन द्वयशीत्यधिक पञ्चशत- सङ्ख्यका: न्यायिकाधिकारिण: स्थानान्तरिता:। येषु षट्त्रिंशदधिक-द्विशत-सङ्ख्यका: अतिरिक्त-जनपद-सत्रन्यायाधीशा: सप्ताधिकद्विशत-सङ्ख्यका: वरिष्ठा: व्यवहार-न्यायाधीशा: नवत्रिंशदधिकैकशत सङ्ख्यका: कनिष्ठस्तरीया: व्यवहार-न्यायाधीशा: सम्मिलिता: विद्यन्ते। अस्य वर्षस्य वार्षिक-स्थानान्तरणस्य आदेश: ह्य: सायं इलाहाबादोच्च-न्यायालयस्य संयुक्त-पञ्जीयक: सतीशकुमार पुष्कर: श्रावितवान्। सर्वे: अधिकारिण: आदिष्टा: यत्ते तात्कालिकरूपेण नवीने स्थाने पदभारग्रहणं स्वीकुर्यु: इति। कानपुरे सर्वाधिक- सङ्ख्यायां त्रयोदश न्यायाधीशानां स्थानान्तरणं जातम् अपरत्र अलीगढ़त: एकादश बरेलीत: च पञ्चन्यायाधीशा: स्थानान्तरिता:।

----------------------------------------------

वायुसेना

भारतीयवायुसेना अद्यारभ्य ग्रीसदेशे समारप्स्यमाणे बहुराष्ट्रियवायु-अभ्यासे इनीयोकॉस-पञ्चविंशतितमे भागं स्वीकरिष्यति। द्वादशदिवसात्मकस्य अभ्यासस्यास्य अतिथ्यं ग्रीसदेशस्य हेलेनिक-वायु-सेना विदधाति। अभ्यासोऽयं एलिस-इत्यस्य ऐतिहासिकक्षेत्रे एण्ड्राविडा-एयरबेस-इत्यत्र समायोजयिष्यते। अभ्यास: एष: अप्रैलमासस्य एकादश-दिनाङ्कं यावत् प्रचलिष्यति। अवधेयं वर्तते यत् भारतीयवायुसेनाया: विमानेषु योद्धृविमानानि आईएल्-78, सी-17, एस.यू-30 एम.के.आई (MKI) इत्येतानि सम्मिलितानि सन्ति। अनेन हि अभ्यासेन विभिन्नदेशानां वायुसेनासु अन्ताराष्ट्रियसहयोग: समन्वयम् अन्तासञ्चालप्रक्रिया: समेधिता: भविष्यन्ति। अयम् अभ्यास: योजनां विनिर्मातुं संयुक्त-वायु-अभियानेषु प्रशिक्षणसम्बद्धान् अवसरान् प्रदास्यति। अपि च कठिन-वायु-युद्ध-परिदृश्ये युद्धनीतिं परिभाषयिष्यति।

---------------------------------------------

विततमन्त्री-अन्तर्जालपटलम्

वित्तमन्त्री निर्मलासीतारामन् इत्येषा श्व: नवदिल्ल्यां नीति-एनसीएईआर (NCAER) राज्यार्थिक-मञ्चस्य वेबफलकस्य शुभारम्भं करिष्यति। राष्ट्रियानुप्रयुक्तार्थिकानुसन्धान-परिषद: सहयोगेन नीत्यायोगेन इदं फलकं विकसितम्। एतस्मिन् वेबफलके एकनवत्यधिक-नवत्यधिक-नवदशशततमवर्षाभ्याम् त्रयोविंशत्यधिक-द्वाविंशत्यधिक-द्विसहस्रतमवर्षयो: भूयोऽपि त्रिंशत्वर्षाणाम् अवधये सामाजिकार्थिक-राजकोषीयमापदण्डेषु शोधप्रतिवेदनेषु पत्रेषु राज्यवित्तेषु च विशेषज्ञानां टिप्पणीनां दत्ताशां समुपलब्धा: विद्यन्ते। इदं हि निश्चप्रचं राजकोषीय-जन-सांख्यिकीय-समार्थिक-दिशानाम् अवबोधप्रक्रियां सरलतया सुलभदत्तांशस्य उपयोगकर्तृणाम् अनुकूलप्रारूपे सौविध्य-प्रदानं करष्यिति।

---------------------------------------------

केन्द्रसर्वकारस्य कर्मचारिणां

केन्द्रसर्वकारस्य कर्मचारिणां कृते एकीकृत-निवृत्तिवेतन-योजना (यू. पी. एस्.) इति श्वः आरभ्य प्रभाविता भविष्यति। यू. पी. एस्. इतीदं केन्द्रसर्वकारेण राष्ट्रिय-निवृत्तिवेतनव्यवस्थायाः अन्तर्गतं विकल्परूपेण प्रवर्तितम् अस्ति। पेन्शन्-निधि-विनियामक-

विकास-प्राधिकरणेन, पी. एफ्. आर्. डी. ए. इत्यनेन सद्यः एव यू. पी. एस्. इत्यस्य परिचालनस्य कृते विनियमा: अधिसूचिता:।

एते नियमाः केन्द्रसर्वकारस्य कर्मचारिणां त्रिभिः समूहैः सम्बद्धाः सन्ति। प्रथमे वर्गे पंचविंशत्यधिक द्विसहस्रतमवर्षस्य अप्रैल मासस्य प्रथम दिनाङ्कपर्यन्तं सेवायां विद्यमानः केन्द्रसर्वकारस्य कर्मचारी अन्तर्भवति।

------------------------------------------------

ईद-उल-फित्र उत्सव:

ईद-उल-फित्र-इति उत्सव: अद्य देशे सम्पूर्णे धार्मिकोल्लासेन सह आमान्यते। अयमुत्सव: रमजानोत्सवस्य समापनस्य प्रतीको विद्यते। ईदगाह्-मस्जिद स्थानेषु नमाज इति समर्पयितुं जना: नानाविधेषु परिधानेषु सज्जा: सन्तीति। जना: पारस्परिकरूपेण ईद उत्सवस्य वर्धापनानि अपि प्रदत्तवन्त:। राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीपधनखड: प्रधानमन्त्री नरेन्द्रमोदी ईद-उल-फित्र इत्येतस्य उत्सवस्य शुभावसरे देशवासिभ्य: शुभकामना: प्रदत्तवन्त:।

------------------------------------------------

वन्दे भारत

प्रधानमन्त्रीनरेन्द्रमोदी अप्रैल-मासस्य ऊनविंशतिदिनाङ्के कटरात: कश्मीराय प्रथमाय वन्दे-भारत-एक्सप्रेस-रेलयानाय हरितध्वजं दर्शयिष्यति। केन्द्रीय: मन्त्री जितेन्द्रसिंह: जम्मूप्रदेशे संवाददातृभि: सह प्रोक्तवान् यत् प्रधानमन्त्री अप्रैल-मासस्य एकोनविंशति-दिनाङ्के ऊधमपुरं सम्प्राप्स्यति। वन्दे-भारत-रेलयानेन जम्मू-श्रीनगरयो: मध्ये यात्राया: समय: अल्प: भविष्यति।

------------------------------------------------

अनुप्रिया-बिसिकॉन

केन्द्रीयस्वास्थ्यराज्यमन्त्री अनुप्रियापटेल: प्रोक्तवती यत् आयुष्मान-भारत-योजनाया: अन्तर्गतं पञ्चाशदधिकैक-शत-मिलियन-परीमिता: महिला: इदानीं यावत् स्तन-कर्क-रोगस्य परीक्षणं कारितवत्य:। नवदिल्ल्यां ब्रेस्ट इमेजिंग सोसायटी ऑफ इंडिया इत्यनेन आयोजितं

मध्यसत्रं मिडटर्म बिसिकॉन-पञ्चविंशत्युद्विसहस्रं सम्बोधयन्ती सा उक्तवती यत् अशेषे देशे द्विशतं दैनिकोपचार-कर्करोगकेन्द्राणि स्थाप्यन्ते।

-----------------------------------------------

उत्तराखण्ड-विषाक्त:

उत्तराखण्डस्य राजधान्यां देहरादूननगरे कुट्टू-इत्यस्य पिष्टं खादित्वा केचन जना: रोगिण: संजाता। ते उपचाराय चिकित्सालये पञ्जीकारिता:। वरिष्ठ-आरक्षि-अधीक्षकेण अजय-सिंहेन सूचितं यत् विभिन्नेभ्य: आपणेभ्य: भण्डागारेभ्य: च क्रीतानि आसान्। मुख्यमन्त्री पुष्कर-सिंहधामी स्वास्थ्य मन्त्री डॉ. धनसिंह रावतश्च कोरोनेशन चिकित्सालयम् उपेत्य रोगिणां परिस्थिति ज्ञातवन्तौ।

-----------------------------------------------

आई.पी.एल.

आई.पी.एल. क्रिकेट् स्पर्धायां मुम्बई इण्डियंस् दलं अद्य सायम् सार्ध सप्त वादने वानखेडे-प्राङ्गणे कोलकाता-नाईट-राइडर्स दलेन सह स्पर्धिष्यते। तत्रैव ह्य: स्पर्धायां राजस्थान-रॉयल्स दलेन चेन्नई सुपर किंग्स् दलं षड्धावनाङ्कै: पराजितम्।

।। इति वार्ता:।।